8. विचित्रः साक्षी

अभ्यासः

प्रश्न 1. एकपदेन उत्तरं लिखत-

(क) कीदृशे प्रदेशे पदयात्रा न सुखावहा?
उत्तराणि:
विजनप्रदेशे

(ख) अतिथि: केन प्रबुद्धः?
उत्तराणि:
पादध्वनिना

(ग) कृशकायः कः आसीत्?
उत्तराणि:
अभियुक्तः

(घ) न्यायाधीशः कस्मै कारागारदण्डम् आदिष्टवान्?
उत्तराणि:
आरक्षिणे

(ङ) कं निकषा मृतशरीरम् आसीत्?
उत्तराणि:
राजमार्ग

प्रश्न 2. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-

(क) निर्धनः जनः कथं वित्तम् उपार्जितवान्?
उत्तर:
निर्धनः जनः अत्यधिक परिश्रम्य वित उपार्जितवान्।

(ख) जनः किमर्थं पदातिः गच्छति?
उत्तर:
जनः अर्थपिडीतेन् पदातिः गच्छति।

(ग) प्रसृते निशान्धकारे स किम् अचिन्तयत्?
उत्तर:
प्रसृते निशान्धकारे स अचिन्तयत, यत् "विजने प्रदेशे पदयात्रा न शुभावह।"

(घ) वस्तुतः चौरः कः आसीत्?
उत्तर:
वस्तुतः चौरः आरक्षी एव आसीत्।

(ङ) जनस्य क्रन्दनं निशम्य आरक्षी किमुक्तवान्?
उत्तर:
जनस्य क्रन्दनं निशम्य आरक्षी उक्तवान्-"रे दुष्ट! तास्मिन् दिने त्वया अहं चोरितायाः मजूषायाः वारितः इदानी निज कृत्यस्य फलं भुङ्श्व! आस्मिन् चौर्या भियोगे, त्वं वर्ष त्रयस्य कारादण्ड लाप्स्यसे इति।

(च) मतिवैभवशालिनः दुष्कराणि कार्याणि कथं साधयन्ति?
उत्तर:
मतिवैभवशालिनः दुष्कराणि कार्याणि नीतिं युक्त च समालम्ब्य लीलयैव साधयन्ति।

प्रश्न 3. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत-

(क) <u>पुत्रं</u> द्रष्टुं सः प्रस्थितः।
उत्तर:
<u>कं</u> द्रष्टुं सः प्रस्थितः?

(ख) करुणापरो गृही <u>तस्मै</u> आश्रयं प्रायच्छत्।
उत्तर:
करुणापरो गृही <u>कस्मै</u> आश्रयं प्रायच्छत्?

(ग) <u>चौरस्य</u> पादध्वनिना अतिथि: प्रबुद्धः।
उत्तर:
<u>कस्य</u> पादध्वनिना अतिथिः प्रबुद्धः?

(घ) न्यायाधीशः <u>बंकिमचन्द्रः</u> आसीत्।
उत्तर:
न्यायाधीशः <u>कः</u> आसीत्?

(ङ) स <u>भारवेदनया</u> क्रन्दति स्म।
उत्तर:
स <u>कथम्</u> क्रन्दति स्म?

(च) उभौ शवं <u>चत्वरे</u> स्थापितवन्तौ।
उत्तर:
उभौ शवं <u>कुत्र</u> स्थापितवन्तौ?

प्रश्न 4. यथानिर्देशमुत्तरत-

(क) 'आदेशं प्राप्य उभौ अचलताम्' अत्र किं कर्तृपदम्?
उत्तर:
आरक्षी चौर्ययौ च

(ख) 'एतेन आरक्षिणा अध्वनि यदुक्तं तत् वर्णयामि' – अत्र 'मार्गे' इत्यर्थे किं पदं प्रयुक्तम्?
उत्तर:
अध्वनि

(ग) 'करुणापरो गृही तस्मै आश्रयं प्रायच्छत्' – अत्र 'तस्मै' इति सर्वनामपदं कस्मै प्रयुक्तम्?
उत्तर:
निर्धन जनाय

(घ) 'ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्' अस्मिन् वाक्ये किं क्रियापदम्?
उत्तर:
आदिस्टवान्

(ङ) 'दुष्कराण्यपि कर्माणि मतिवैभवशालिनः' – अत्र विशेष्यपदं किम्?
उत्तर:
मति

प्रश्न 5. सन्धि/सन्धिविच्छेदं च कुरुत-

(क) पदातिरेव – _____ + _____
उत्तर:
पदातिरेव – पदातिः + एव

(ख) निशान्धकारे – _____ + _____
उत्तर:
निशान्धकारे – निशा + अन्धकारे

(ग) अभि + आगतम् – _____
उत्तर:
अभि + आगतम् – अभ्यागतम्

(घ) भोजन + अन्ते – _____
उत्तर:
भोजन + अन्ते – भोजनान्ते

(ङ) चौरोऽयम् – _____ + _____
उत्तर:
चौरोऽयम् – चौरः + अयम्

(च) गृह + अभ्यन्तरे – _____
उत्तर:
गृह + अभ्यन्तरे – गृहाभ्यन्तरे

(छ) लीलयैव – _____ + _____
उत्तर:
लीलयैव – लीलया + एव

(ज) यदुक्तम् – _____ + _____
उत्तर:
यदुक्तम् – यत् + उक्तम्

(झ) प्रबुद्धः + अतिथिः – _____
उत्तर:
प्रबुद्धः + अतिथिः – प्रबुद्धोऽतिथिः

प्रश्न 6. अधोलिखितानि पदानि भिन्न-भिन्न प्रत्ययान्तानि सन्ति।
तानि पृथक् कृत्वा निर्दिष्टानां प्रत्ययानामधः लिखत-

परिश्रम्य, उपार्जितवान्, दापयितुम्, प्रस्थितः, द्रष्टुम् . विहाय, पृष्टवान्, प्रविष्टः, आदाय, क्रोशितुम्, नियुक्तः, नीतवान्, निर्णतुम्, आदिष्टवान्, समागत्य, मुदितः।

ल्यप् क्त क्तवतु तुमुन्

_____ _____ _____ _____
_____ _____ _____ _____
_____ _____ _____ _____

उत्तर:
ल्यप् क्त क्तवतु तुमुन्
परिश्रम्य प्रास्थितः उपार्जितवान् दापयितुम्
विहाय प्रविष्टः पृष्टवान द्रष्टुम्
आदाय नियुक्तः नीतवान् क्रोशितुम्
समागत्य मुर्दितः आदिष्टवान् निर्णतुम्

प्रश्न 7. (अ) अधोलिखितानि वाक्यानि बहुवचने परिवर्तयत-

(क) स बसयानं विहाय पदातिरेव गन्तुं निश्चयं कृतवान्।
उत्तर:
ते बसयानं विहाय पदातिरेव गंतुम् निश्चयं कृतवन्तः।

(ख) चौरः ग्रामे नियुक्तः राजपुरुषः आसीत्।
उत्तर:
चौराः ग्रामे नियुक्ताः राजपुरुषाः आसन्।

(ग) कश्चन चौर: गृहाभ्यन्तरं प्रविष्टः।
उत्तर:
केचन चौराः गृहाभ्यन्तरं प्रविष्टाः।

(घ) अन्येद्युः तौ न्यायालये स्व-स्व-पक्षं स्थापितवन्तौ।
उत्तर:
अन्येषुः ते न्यायालये स्व-स्व-पक्षं स्थापितवन्त।

(आ) कोष्ठकेषु दत्तेषु पदेषु यथानिर्दिष्टां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत-

(क) सः _____ निष्क्रम्य बहिरगच्छत्। (गृहशब्दे पंचमी)
उत्तर:
गृहात्

(ख) गृहस्थ: _____ आश्रयं प्रायच्छत्। (अतिथिशब्दे चतुर्थी)
उत्तर:
अतिथये

(ग) तौ _____ प्रति प्रस्थितौ। (न्यायाधिकारिन् शब्दे द्वितीया)
उत्तर:
न्यायोधिशं

(घ) _____ चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्ड लप्स्यसे। (इदम् शब्द सप्तमी)
उत्तर:
अस्मिन्

(ङ) चौरस्य _____ प्रबुद्धः अतिथि:। (पादध्वनिशब्दे तृतीया)
उत्तर:
पादध्वनिना

योग्यताविस्तारः

(क) विचित्रः साक्षी
न्यायो भवति प्रमाणाधीनः। प्रमाणं विना न्यायं कर्तुं न कोऽपि क्षमः सर्वत्र। न्यायालयेऽपि न्यायाधीशाः यस्मिन् कस्मिन्नपि विषये प्रमाणाभावे न समर्थाः भवन्ति। अतएव, अस्मिन् पाठे चौर्याभियोगे न्यायाधीशः प्रथमतः साक्ष्य (प्रमाणम्) विना निर्णेतु नाशक्नोत्। अपरेधुः यदा स शवः न्यायाधीश सर्व निवेदितवान् सप्रमाण तदा सः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मान मुक्तवान्। अस्य पाठस्य अयमेव सन्देशः।

(ख) मतिवैभवशालिनः
बुद्धिसम्पत्तिसम्पन्नाः। ये विद्वांसः बुद्धिस्वरूपविभवयुक्ताः ते मतिवैभवशालिनः भवन्ति। ते एव बुद्धिचातुर्यबलेन असम्भवकार्याणि अपि सरलतया कुर्वन्ति।

(ग) स शवः
न्यायाधीश बंकिमचन्द्रमहोदयैः अत्र प्रमाणस्य अभावे किमपि प्रच्छनः जनः साक्ष्य प्राप्तुं नियुक्तः

जातः। यद् घटितमासीत् सः सर्वं सत्यं ज्ञात्वा साक्ष्यं प्रस्तुतवान्। पाठेऽस्मिन् शवः एव 'विचित्रः साक्षी' स्यात्।